FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

This Question Paper consists **42 questions and 8 printed pages.**
अस्मिन् प्रश्नपत्रे 42 प्रश्ना: एवम् 8 मुद्रित पृष्ठा: सन्ति।

Roll No.
अनुक्रमाङ्क :
अङ्केषु

Code No.
कूट सं. **51/S/O/S**

Set **A**

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination
( परीक्षादिवस: दिनाङ्कश्च ) ______________________

Signature of Invigilators 1. ______________________
( निरीक्षकहस्ताक्षरद्वयम् )
2. ______________________

firstranker.com
www.FirstRanker.com

**सामान्य अनुदेशा: :**

1. अनुक्रमाङ्क: प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीय:।

2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्ना: क्रमानुसारमेव सन्ति।

3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तरपुस्तिकामध्ये लिखेत्।

4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।

5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।

6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या 51/S/O/S अवश्यं लेखनीया।



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

# SANSKRIT

# संस्कृतम्

# (209)

समय : होरात्रयम् ] [ पूर्णाङ्काः - 100

**निर्देशा :** (1) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति।
(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः।
(3) **सर्वे** प्रश्नाः **अनिवार्याः**।

## खण्ड - क

1. गुरुगतां विद्यां कः अधिगच्छति? 1
   (A) शिष्यः (B) छात्रः
   (C) बालकाः (D) शुश्रूषुः

2. कूपसमीपे एकः विशालः __________ आसीत्। 1
   (A) उद्यानम् (B) गर्तः
   (C) नदी (D) शिलाखण्डः

3. "त्याज्यं न धैर्यम्" इति पाठे मकरी किं खादितुमिच्छति? 1
   (A) वानरम् (B) जम्बुफलानि
   (C) वानरहृदयम् (D) न किमपि

4. गर्दभे एषः गुणः नास्ति - 1
   (A) सन्तोषः (B) इन्द्रियसंयमः
   (C) भारवहनम् (D) शीतोष्णसहनम्

5. प्राणादिषु कः श्रेष्ठः सिद्धः? 1
   (A) चक्षुः (B) मनः
   (C) प्राणाः (D) श्रोत्रम्



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

6. 'वाचा' इति पदे का विभक्तिः ? 1

(A) प्रथमा (B) तृतीया

(C) द्वितीया (D) पञ्चमी

7. '<u>अशक्तैः</u> बलिनः शत्रोः पलायनं कर्तव्यम्' इति पंक्त्यां रेखाङ्कितपदे का विभक्तिः ? 1

(A) तृतीया (B) षष्ठी

(C) प्रथमा (D) द्वितीया

8. द्वावेतौ सुख<u>मेधेते</u> अत्र एधेते इति क्रियापदे कः लकारः ? 1

(A) लोट् (B) लङ्

(C) लट् (D) विधिलिङ्

9. "मत्स्यजीविनः" इत्यस्य पदस्य मूलशब्दः कः ? 1

(A) मत्स्यजीवः (B) मत्स्यजीवी

(C) मत्स्यजीवि (D) मत्स्यजीविन्

10. रिक्तस्थाने किं पदं भविष्यति ? 1

सुरक्षितं दैवहतं ________ .

(A) तिष्ठति (B) जीवति

(C) विनश्यति (D) प्रसीदति

11. धर्मस्य किमपि लक्षणद्वयं लिखत। 1+1=2

12. (i) यद् भविष्यो विनश्यति इति पाठे केषां वचः कुलिशपातोपमम् आसीत् ? 1+1=2

(ii) यद्भविष्यः तत् सरः त्यजति न वा ?

13. चित्रकूटे कः कं प्रसादयितुमागतः ? 1+1=2



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1x3=3**

कण्वः – वत्से! अलं रुदितेन। स्थिरा भव। इतः पन्थानम् आलोकय। अस्मिन् नतोन्नते मार्गे ते पदानि विषमीभवन्ति।

शार्ङ्गरवः – भगवन्! ओदकान्तं स्निग्धो जनोनुगन्तव्यः इति श्रूयते। तदिदं सरस्तीरम् अत्र सन्दिश्य प्रतिगन्तुमर्हति भवान्।

कण्वः – शकुन्तले! त्वं गुरुन् शुश्रूषस्व, परिजनेषु उदारा भव। समृद्धिषु अगर्विता भव।।

**प्रश्नाः**

(i) कण्वः कुत्र स्थित्वा शकुन्तलाम् उपदिशति?

(ii) कण्वः शकुन्तलां किमुपदिशति?

(iii) 'मार्गे' इति विशेष्यस्य किं विशेषणम् अत्र प्रयुक्तम्?

**15.** कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत – **1x5=5**

लवः

**अथवा**

दौवारिकः

**16.** प्रश्नान् उत्तरतः **1+1=2**

(i) के अन्येभ्यः छायां कुर्वन्ति स्वयं च आतपे तिष्ठन्ति।

(ii) 'सीमन्तिनीषु का शान्ता?' इति प्रहेलिकायाः किमुत्तरम्?

**17.** आकाशात् कः उच्चतरः? वातात् च किं शीघ्रतरम्? **1+1=2**

**18.** नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते। **½x4=2**

तस्मात्कायविशुद्ध्यर्थं स्नानमादौ विधीयते।।

इति स्नानात् के लाभाः? स्नानं कदा च करणीयम्?

**19.** तत्रास्तीशः कठिनां भूमिं यत्र हि कर्षति लाङ्गलिकः इत्यत्र ईशः कुत्र तिष्ठति? **2**

**20.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – **1x3=3**

स्वस्ति पन्थानमनुचरेम सूर्या चन्द्र मसाविव।

पुनर्ददताऽघ्नता ज्यनता संगमेमहि

**प्रश्नाः**

(i) वयम् कीदृशं पन्थानम् अनुचरेम?

(ii) कौ सर्वदा सर्वेषां हितं कुरुतः?

(iii) वयं कैः सह संगतिं कुर्याम?



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

21. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। 1x3=3
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते
इति पद्यस्य निम्नलिखिते अन्वये रिक्तस्थानपूर्तिं कुरुत –
अनुद्वेगकरम् वाक्यम् ___(i)___ प्रियहितम् च स्वाध्यायाभ्यसनम् ___(ii)___ एव ___(iii)___ तपः उच्यते।

22. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु – 1+1=2
(i) इयं स दृश्यते गंगा।
(ii) मित्रस्य चक्षुषा मां सर्वाणि भूतानि समीक्षन्ताम्।

23. (i) त्वादृशाः एव प्रभूणां पुरस्कारभाजनानि भवन्ति इति कः कं वदति? 1+1=2
(ii) न वयं शिवगणास्तादृशाः? इति अत्र 'वयम्' सर्वनामपदं कस्मै प्रयुक्तम्?

24. जलेषु किं किं न पातव्यम्? 2

25. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत – 1x3=3
ध्यायन् क्लेशान् स्वबन्धूनां तद्धितैकपरायणः।
विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा।।
(i) मुनिः बुद्धः इव कः सर्वेषां हितं करोति?
(ii) बुद्धः कुत्र विराजते स्म?
(iii) महात्मा केषां क्लेशान् हरति?

26. अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1x3=3
एष सांग्रामिको न्यायः, एष धर्मः सनातनः।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः।।
**प्रश्नाः**
(i) एषः कथंविधः न्यायः?
(ii) एषः कीदृशः धर्मः?
(iii) इयं केषां चारित्रपद्धतिः?

27. कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत – 1x5=5
(i) प्राणस्य श्रेष्ठत्वम्
(ii) करुणापराः हि साधवः
(iii) यद्भविष्यो विनश्यति



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

## खण्ड – ख

## अनुप्रयुक्त व्याकरणम्

28. अधोलिखितेषु कण्ठ्यवर्णौ अनुप्रयुक्तव्याकरणम् चिनुत। 1x2=2

त्, च्, ग्, य्, द्, क्

29. रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा नाम लिखत – 1x3=3

सत्यमेवेश्वरो लोके, सत्ये धर्मः सदाश्रितः

सत्यमूलानि सर्वाणि, सत्यान्नास्ति परं पदम्

30. सन्धिं कुरुत – 1+1=2

(i) तस्मात् + जिघ्रन्ति पादयाः

(ii) सुकलत्रः शिशुप्रेमी पिता इव आश्रयवासिनाम्।

31. माता भूमिः पुत्रोऽहं पृथिव्याः इति रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ? 1+1=2

32. रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत – 1x3=3

(i) ___(10)___ पुत्रसमो द्रुमः

(ii) ___(5)___ इन्द्रियाणि

(iii) ___(2)___ हस्तौ

33. का वा क्षतिरिह तेन भवेत् ते 1+1=2

तत्त्वमिदं चिन्तय चित्ते।

रेखाङ्कितपदयोः कः धातुः कश्च लकारः ?

34. माता गुरुतरा भूमेः, खात् पितोच्चतरस्तथा 1+1=2

रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ?

35. अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – 1+1=2

(i) आगच्छ दुर्गाध्यक्ष समीपे।

(ii) वयं गिरिकन्दरेषु विचरामः।



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

36. अधोलिखितविग्रहाणां कृते समस्तपदं लिखत – 1+1=2

(i) सुस्मितम् आननं यस्य सः।

(ii) सर्वाणि भूतानि।

37. रिक्तस्थाने किं पदं भविष्यति? 1+1=2

(i) अस्य योगदानं __________ वैज्ञानिकाः उपग्रहं निर्मितवन्तः। (प्र + शंस् + शतृ)

(ii) अनसूये! अलं __________ (रुद् + क्त्वा)

38. रिक्तस्थानपूर्तिं कुरुत – 1x3=3

(i) आनन्दयति कोऽप्यर्थं __________ एव भूतले। (सज्जन)

(ii) कः __________ प्रबोधयति। (पद्म)

(iii) त्वं गच्छ, __________ च प्रीणय। (पत्नी)

## खण्ड – ग
## रचनाकौशलम्

39. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1x5=5

संस्कृतभाषायां कथासाहित्यं तु महता प्रभावेन दृश्यते। पञ्चतन्त्रं, हितोपदेशः, बृहत्कथा, सिंहासनद्वात्रिंशिका, कथासरित्सागरः इत्यादिषु रामायण महाभारत पुराणादिषु च विस्तृतः कथाप्रवाहः दृश्यते। बौद्धधर्मे अपि जातककथादयः सुप्रसिद्धाः। लौकिकविषयम् अवलम्ब्य रचिताः जैनकथाः अपि अनेकाः सन्ति। नीतिप्रवणता, आध्यात्मिकी प्रगतिः, आत्मोन्नतिः इत्यादयः अंशाः एतासु कथासु प्राधान्यम् आवहन्ति। एतासु कथासु निबद्धाः श्लोकाः कथामाध्यमेन जीवननिर्माणस्य सन्देशं प्रयच्छन्ति। एष एव उपदेशः एतासां कथानाम् उद्देश्यम्।

**प्रश्नाः**

(i) विस्तृतः कथाप्रवाहः कस्मिन् महाकाव्ये दृश्यते?

(ii) जातककथाः कस्मिन् धर्मे सुप्रसिद्धाः?

(iii) कथासु निबद्धाः श्लोकाः कस्य सन्देशं प्रयच्छन्ति?

(iv) 'प्रमाणेन' इति पदस्य विशेषणं किम्?

(v) 'संक्षिप्तः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

40. अधोलिखितविषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत – 1x5=5

शरीरमाद्यं खलु धर्मसाधनम्

**मञ्जूषा**

| |
|---|
| स्वास्थ्यं, शरीरस्य, आवश्यकम्, कार्यसम्पादनम्, जीवने सफलतायै, वरदानम्, दीर्घजीवनस्य कामना, स्वस्थं मनः, बुद्धिः, स्वस्थः आत्मा जीवनम् आनन्दमयम्। |



FirstRanker.com
Firstranker's choice
www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

41. भवान् सौरभ:। भवतां मित्रं सुरेश: संस्कृतश्लोक-वाचनप्रतियोगितायां प्रथमपुरस्कारं लब्धवान्। तम् प्रति अभिनन्दनपत्रं मंजूषायां प्रदत्तै: शब्दै: रिक्तस्थानानि पूरयित्वा लिखतु। 1x5=5

मालवीय नगरम्
तिथि: ___________

प्रिय मित्र सुरेश
नमस्ते
भवान संस्कृत श्लोक वाचने प्रथमं ___(i)___ प्राप्तवान् इति ज्ञात्वा अतीव ___(ii)___ जाता। त्वं तु सत्यमेव ___(iii)___ इति मन्ये। लिखतु ___(iv)___ त्वं गृहम् आगमिष्यसि। सर्वे त्वां स्मरन्ति ___(v)___ च।
तव सुहृत्
सौरभ:

**मञ्जूषा**

प्रतिभाशाली, सम्मानम्, प्रसन्नता, अभिनन्दन्ति, कदा, विद्यालये

42. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1x5=5



**मञ्जूषा**

पंचवट्यां कुटी, राम: सीता मयूर:, लक्ष्मण:, पुष्पाणि, पत्राणि, नद्या: तटे, हंस:, उपविष्टौ, हस्ते धनु:, तिष्ठति, कमलपुष्पम्, खादति, पार्श्वे हरिण:, पश्यति

- o O o -



FirstRanker.com
Firstranker's choice
www.FirstRanker.com